श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीरङ्गनाथ पादुकासहस्रम् ॥

## ॥ मरकतपद्धतिः एकोनविंशी ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ मरकतपद्धतिः एकोनविंशी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

वन्दे गारुत्मतीं वृत्त्या मणिस्तोमैश्च पादुकाम्।
यया नित्यं तुळस्येव हरितत्त्वं प्रकाश्यते॥ १९.१ ॥

सविलासगतेषु रङ्गभर्तुः त्वदधीनेषु बहिष्कृतो गरुत्मान्।
अधिगच्छति निर्वृतिं कथञ्चित् निजरत्नैस्त्वयि पादुके ! निविष्टैः॥ १९.२ ॥

समये मणिपादुके ! मुरारेः मुहुरन्तःपुरमुग्धचेटिकास्ते।
हरितान् हरिदश्मनां मयूखान् तुळसीपल्लवशङ्कया क्षिपन्ति॥ १९.३ ॥

हरितः सहसा हरिन्मणीनां प्रभया रङ्गनरेन्द्रपादरक्षे !।
तुळसीदलसम्पदं दधाति त्वयि भक्तैर्निहितः प्रसूनराशिः॥ १९.४ ॥

प्रसादयन्ती मणिपादुके ! त्वं विक्षेपयोगेन विहारवेलाम्।
हरिन्मनोज्ञा हरिकान्तिसिन्धोः सन्दृश्यसे शैवलमञ्जरीव॥ १९.५ ॥

बध्नासि रङ्गेश्वरपादरक्षे ! हरिन्मणीनां प्रभया स्फुरन्त्या।
चूडापदेषु श्रुतिसुन्दरीणां माङ्गल्यदूर्वाङ्कुरमाल्यपङ्क्तिम्॥ १९.६ ॥

अच्छेद्यरश्मिनियतैर्घटिता हरिद्भिः
सद्वर्त्मना गतिमती मणिपादरक्षे !।
सन्दृश्यसे सवितृमण्डलमध्यभाजो
रङ्गेश्वरस्य रथसम्पदिवापरा त्वम्॥ १९.७ ॥

श्यामायमाननिगमान्तवनोपकण्ठाः
स्थाने पदावनि ! हरिन्मणयस्त्वदीयाः।
पर्यन्तशाद्वलवतीं प्रथयन्ति नित्यं
नारायणस्य रुचिरां नखरश्मिगङ्गाम्॥ १९.८ ॥

उद्दिश्य काममपि गतिं मणिपादरक्षे !
    रङ्गेश्वरस्य चरणे विनिवेशितात्मा।
प्रायो हरिन्मणिरुचा दृढभक्तिबन्धा
    प्रादुष्करोति भवती तुळसीवनानि॥ १९.९ ॥

सेवार्थमागतवतां त्रिदशेश्वराणां
    चूडामणिप्रकरशालिषु मौळिषु त्वम्।
संवर्तयस्यसुरमर्दनपादरक्षे !
    स्वेनाश्मगर्भमहसा शुकपङ्क्तिशोभाम्॥ १९.१० ॥

दरपरिणतदूर्वा वल्लरीनिर्विशेषैः
    मरकतशकलानां मांसलैरंशुजालैः।
पशुपतिविधृता त्वं तस्य पाणौ निषण्णं
    मधुरिपुपदरक्षे ! वञ्चयस्येणशाबम्॥ १९.११ ॥

हरिचरणसरोजन्यासयोग्यं भवत्याः
    प्रगुणमभिलषन्त्यो वर्णलाभं तुळस्यः।
प्रतिदिनमुपहारैः पादुके ! तावकानां
    मरकतशकलानामाश्रयन्ते मयूखान्॥ १९.१२ ॥

हरितमणिमयूखैरञ्चिताध्यात्मगन्धैः
    दिशसि चरणरक्षे ! जातकौतूहला त्वम्।
दनुजमथनलीलादारिकाणामुदारां
    दमनकदळपङ्क्तिं देवि ! मौलौ श्रुतीनाम्॥ १९.१३ ॥

अधिगतबहुशाखैरश्मगर्भप्रसूतैः
    मधुरिपुपदरक्षे ! मेचकैरंशुजालैः।
अनितरशरणानां नूनमारण्यकानां
    किमपि जनयसि त्वं कीचकारण्यदुर्गम्॥ १९.१४ ॥

प्रचुरनिगमशाखां पादुके ! रङ्गिणस्त्वां
    चरणनखमयूखैश्चारुपुष्पानुबन्धाम्।

मरकतदळरम्यां मन्महे सञ्चरन्तीं
कनकसरिदनूपे काञ्चिदुद्यानलक्ष्मीम्॥ १९.१५ ॥

नखकिरणनिकायैर्नित्यमाविर्मृणाले
महितरसविशेषे मेचकैरंशुभिस्ते।
परिकलयसि रम्यां पादुके ! रङ्गभर्तुः
पदकमलसमीपे पद्मिनीपत्रपङ्क्तिम्॥ १९.१६ ॥

अनिमिषयुवतीनामार्तनादोपशान्त्यै
त्वयि विनिहितपादे लीलया रङ्गनाथे।
दधति चरणरक्षे ! दैत्यसौधानि नूनं
मरकतरुचिभिस्ते मङ्क्षु दूर्वाङ्कुराणि॥ १९.१७ ॥

विपुलतममहोभिर्वीतदोषानुषङ्गं
विलसदुपरिनैल्यं देवि ! विष्णोः पदं तत्।
पृथुमरकतदृश्यां प्राप्य पादावनि ! त्वां
प्रकटयति समन्तात् सम्प्रयोगं हरिद्भिः॥ १९.१८ ॥

पद्माभूम्योः प्रणयसरणिर्यत्र पर्यायहीना
यत्संसर्गादनघचरिताः पादुके ! कामचाराः।
तारासक्तं तमिह तरुणं प्रीणयन्ते जरत्यो
नित्यश्यामास्तव मरकतैर्नूनमाम्नायवाचः॥ १९.१९ ॥

स्थलकमलिनीव काचित् चरणावनि ! भासि कमलवासिन्याः।
यन्मरकतदळमध्ये यः कश्चिदसौ समीक्ष्यते शौरिः॥ १९.२० ॥

॥ इति श्रीपादुकासहस्रे मरकतपद्धतिः एकोनविंशी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥